National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(56): 208-209
© 2024 NJHSR
www.sanskritarticle.com

**Dr. Balabhadra Upadhyaya**
Head, Dept. of Atharvaveda,
S.V.Vedic University,
Tirupati, 517502

**Correspondence:**
**Dr. Balabhadra Upadhyaya**
Head, Dept. of Atharvaveda,
S.V.Vedic University,
Tirupati, 517502

# अथर्वशब्दनिरुक्तिः

**Dr. Balabhadra Upadhyaya**

**प्रस्तावना**

सम्पूर्णवैदिकवाङ्मये पुरुषार्थचतुष्टयसम्प्राप्त्यर्थं चत्वारो वेदाः ऋग्-यजु-साम-अथर्वाख्याः देदीप्यमानाः प्रादीपसदृशाः विराजन्ते। एते सर्वेऽपि वेदाः भारतीयप्राचीनसंस्कृतेः सभ्यतायाश्च मूलभूताः भवन्ति।

**अथर्वशब्दनिर्वचनम्-**

“अथर्व” इति शब्दः ‘अथ’ + ‘अर्व’ इत्येतयोः संयोगेन निष्पन्नः।

१. "अथ" शब्दः मङ्गलार्थकः शुभारम्भं सूचयति।

२. "अर्व" धातोः गतौ अर्थः गतिः, प्रवाहः च सूच्यते।

अत एव "अथर्व" इति शब्दः "शुभं प्रवाहयति" इत्यर्थं द्योतयति।

"अथर्वा यज्ञसम्बन्धिनः मन्त्राः"- यः मन्त्रः क्रियायुक्तो भवति, स अथर्व इत्युच्यते।

अथवा "अथर्वा अग्निपुत्रः ऋषिः" यस्य नाम्ना एष वेदः प्रसिद्धः, तस्मात् एष "अथर्ववेदः" इति नाम्ना अभिधीयते।

अथर्वशब्दस्य निरुक्तिः - "अथ" (मङ्गलम्)+ "अर्व" (गमनम्) इति समासेन "अथर्व" इत्यस्य अर्थः "शुभगमनं" वा "मङ्गलप्रवृत्तिः" इत्यस्ति। अथवा 'अथर्वा' नामकस्य ऋषेः सम्बन्धे एषः शब्दः प्रयुज्यते।

**अथर्वशब्दनिरुक्तिः-**

निरुक्ते गोपथब्राह्मणे च “अथर्वन्” इति शब्दस्य द्विप्रकारकं व्याख्यानं लभ्यते यथा- निरुक्ते “अथर्वाणोऽथर्वन्तः। थर्वतिश्च रतिकर्मा तत् प्रतिषेधः”। अत्र थर्व = धातुः गत्यर्थे प्रयुक्तः, अतः अथर्वन् इत्यस्य अर्थो भवति – गतिहीनः स्थिरो वा। यो वेदः स्थिरताविषये चित्तवृत्तिनिरोधविषये योगोपदेशं ददाति सः वेदः “अथर्वन्” इति अभिप्रायः।

गोपथब्राह्मणे अथर्वा शब्दः “अथार्वाक्” इतिशब्दस्य संक्षिप्ररूपं भवति। अथ + अर्वाक् = अथर्वा । अर्थात् अथर्ववेदे आत्मसाक्षात्कारस्य उपदेशः लभ्यते। यथा उक्तं गोपथब्राह्मणे “अथ अर्वाग् एनं ... अन्विच्छेति, तद् यद् अब्रवीद् अथावङ् एनमेतासु अप्सु, अविच्छेति तदथर्वाऽभवत्। अथर्ववेदे तथाविधानि आत्मविद्यासम्बद्धानि सुक्तानि अत्र प्रमाणभूतानि भवन्ति। यथा –“ आत्मा” ,” ज्येष्ठ ब्रह्म”,“ब्रह्मविद्या”,“उच्छिष्ट ब्रह्म”,” महत् ब्रह्म” इत्यादीनि।

शतपथब्राह्मणे अथर्ववेदः प्राणः इति उच्यते। यथा - प्राणोऽथर्वा। अथर्वाऋषि: अस्य वेदस्य द्रष्टा इति हेतो: “अथर्ववेद “नाम भवतीति केचन आमनन्ति। काशिकावृत्तौ थर्व धातुः हिंसार्थे

उक्तः। थर्व कौटिल्यहिंसायाम् इति धातोः निष्पन्नः नञर्थकः अथर्वशब्दः अहिंसार्थं द्योतयति। येन वेदेन अहिंसावृत्त्या मनः स्थिरं भवति सः अथर्ववेदः इति अभिप्रायः।

एवम् अथर्ववेदो ब्रह्मवेदः, अमृतवेदः, आत्मवेदः, अङ्गिरो वेदः, अङ्गिरसवेदः, अथर्वाङ्गिरसवेदः, भृग्वङ्गिरो वेदः, क्षेत्रवेदः, भैषज्यवेदः, छन्दोवेदः, महीवेद इत्यप्युच्यते। अथर्ववेद ऐहिकफलदायकोऽस्ति। अथर्ववेदस्य ऋत्विक् "ब्रह्मा"। प्रस्थानभेदे लिखितमस्ति यत् – "अथर्ववेदस्तु यज्ञानुपयुक्तः शान्तिपौष्टिकाभिचारादिकर्मप्रतिपादकत्वेनात्यन्तविलक्षण एव" इति।

अथर्ववेदस्य नामकरणविषये एका कथा श्रूयते। यथा -

पुरा सृष्ट्यर्थं स्वयम्भूः ब्रह्मा तपस्तेपे। तस्मात् तयमानेभ्यः रोमकूपेभ्यः स्वेदधारा अजायन्त। तासु स्वेदजाता अप्सु स्वां छायां पश्यन्तो रेतस्क्रन्द। तद्रेतः संहिता आपो द्विरूपा अभवन्। तत्रैकतः स्थितं रेतो भृज्यमानं सत् भृगुर्नाम महर्षिरभवत्। स एव भृगुः स्वोत्पादकस्य तिरोहितस्य ब्रह्मणो दर्शनाय "अथर्वाग् एनम् एतास्वे वाप्स्वन्विचृछ" इति। अशरीरया वाचोक्तत्वात् अथर्वाभवत्। अवशिष्टरेतोयुक्ताभिरद्भिरावृत्तस्य वरुणशब्दस्य सर्वेभ्योङ्गेभ्यो रसोऽक्षरत्। सोऽङ्गरस भूतत्वात् अङ्गिरा नाम महर्षिरभवत्। ततः तस्मात्कारणात् ब्रह्मा तमथर्वाणमङ्गिरसं चाभ्यतपत्।

ततः एकर्चद्वृचादिमन्त्रद्रष्टारो विंशतिसंख्याकाः अथर्वाणोऽङ्गिरसश्चोत्पन्नाः। तेभ्यः ऋषिभ्यः सकाशात् स्वयम्भूर्ब्रह्मा यान् अद्राक्षीत् सोऽथर्वाङ्गिरः शब्दवाच्यो वेदोऽभवत्। अत एकर्चादीनामृषीणां विंशतिसंख्याकत्वाद् वेदोऽपि विंशतिकाण्डात्मकः सम्पन्नः। अत एव सारत्वाद् अयं वेदः श्रेष्ठः। श्रूयते हि– "श्रेष्ठो हि वेदस्यपसोऽधिजातो ब्रह्मज्ञानां हृदये सम्बभूव"। एतद् वै भूयिष्ठं ब्रह्म यद् भृग्वङ्गिरसः। येऽङ्गिरसः स रसः। योऽथर्वाणस्तद् भेषजं यद् भेषजं तदमृतं यद् अमृतं तद् ब्रह्म। एवं सारभूतब्रह्मात्मकत्वात् ब्रह्मकर्मप्रतिपादनाच्च अयं ब्रह्मवेद इति। अत एव सारवत्त्वात् सिद्धमन्त्रता समाम्नायते पाश्चात्त्यविदुषां मते "अथर्वाङ्गिरसौ "व्यर्थकौ भवतः। "अथर्व" शब्दार्थः पवित्राभिचारो भवति, यश्चानन्दं जनयति प्रीतिश्चोत्पादयति। पाश्चात्त्यशब्दावल्यां तथाविधाभिचारः श्वेताभिचार इति संज्ञितो भवति। अन्यत आङ्गिरसो विरोधात्मकाभिचारोऽस्ति। स कृष्णाभिचारशब्देन व्यवहृतोऽस्ति।

**• सन्दर्भग्रन्थसूची-**


१. निरुक्त – चौखम्बा संस्कृत सीरीज आफिस, वाराणसी २२१००१
२. गोपथब्राह्मणम् – चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली ११०००७
३. शतपथब्राह्मणम् – सम्पूर्णानन्द संस्कृत विश्वविद्यलय, वाराणसी २२१००२


**• पादटिप्पणी-**

१. निरुक्तम्- अ.११/सू.१८

२. गो.ब्रा.- पूर्वभागे-१.४

३. श.ब्रा. ६.४.२.२